श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीरङ्गनाथ पादुकासहस्रम् ॥

## ॥ प्रतिप्रस्थानपद्धतिः पञ्चमी ॥

*This document[*] has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

[*] This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ प्रतिप्रस्थानपद्धतिः पञ्चमी ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

प्रशस्ते रामपादाभ्यां पादुके पर्युपास्महे।
आनृशंस्यं ययोरासीदाश्रितेष्वनवग्रहम्॥ ५.१ ॥

भृशातुरसहोदरप्रणयखण्डनस्वैरिणा
पदेन किमनेन मे वनमिहावनादिच्छता।
इतीव परिहाय तन्निववृते स्वयं यत् पुरा
पदत्रमिदमाद्रिये धृतजगत्त्रयं रङ्गिणः॥ ५.२ ॥

दशवदनविनाशं वाञ्छतो यस्य चक्रे
दशरथमनघोक्तिं दण्डकारण्ययात्रा।
स च भरतविमर्दे सत्यसन्धस्त्वयासीत्
रघुपतिपदरक्षे ! राजधानीं प्रयान्त्या॥ ५.३ ॥

अभ्युपेतविनिवृत्तिसाहसा देवि ! रङ्गपतिरत्नपादुके।
अत्यशेत भवती महीयसा पारतन्त्र्यविभवेन मैथिलीम्॥ ५.४ ॥

अव्याहतां रघुपतेः वहतः प्रतिज्ञाम्
अंसाधिरोहणरसे विहते धरण्याः।
प्रादान्निवृत्य भवती मणिपादरक्षे !
स्पर्शं पदेन विगतव्यवधानखेदम्॥ ५.५ ॥

मन्त्राभिषेकविरहाद् भजता विशुद्धिं
संस्कारवर्जनवशादभिसंस्कृतेन।
मूर्ध्ना निनाय भरतो मणिपादुके ! त्वां
रामाज्ञया विनिहितामिव राज्यलक्ष्मीम्॥ ५.६ ॥

रक्षार्थमस्य जगतो मणिपादरक्षे !
    रामस्य पादकमलं समये त्यजन्त्योः।
किं दुष्करं तव विभूतिपरिग्रहो वा
    किं वा विदेहदुहितुः कृपणा दशा सा॥ ५.७ ॥

सीतासखस्य सहसा चरणारविन्दात्
    भक्त्या नते कृतपदा भरतोत्तमाङ्गे।
आरुह्य नागमभितो भवती वितेने
    मायूरचामरभरं मणिरश्मिजालैः॥ ५.८ ॥

मूर्ध्ना मुकुन्दपदरक्षिणि ! बिभ्रतस्त्वाम्
    आविर्मदस्य रघुवीरमदावळस्य।
आमोदिभिस्सपदि दानजलप्रवाहैः
    लेभे चिराद्वसुमती रुचिरं विलेपम्॥ ५.९ ॥

आशाः प्रसाधयितुमम्ब ! तदा भवत्यां
    दैवादकाण्डशरदीव समुत्थितायाम्।
स्तोकावशेषसलिलास्सहसा बभूवुः
    साकेतयौवतविलोचनवारिवाहाः॥ ५.१० ॥

अन्ते वसन्नचरमस्य कवेस्स योगी
    वन्यान् प्रगृह्य विविधान् उपदाविशेषान्।
आतस्थुषीं रघुकुलोचितमौपवाह्यम्
    प्रत्युज्जगाम भवतीं भरतोपनीताम्॥ ५.११ ॥

मातस्त्वदागमनमङ्गळदर्शिनीनां
    साकेतपक्ष्मळदृशां चटुलाक्षिभृङ्गैः।
जातानि तत्र सहसा मणिपादरक्षे !
    वातायनानि वदनैश्शतपत्रितानि॥ ५.१२ ॥

साकेतसीम्नि भवती मणिपादरक्षे !
    माङ्गल्यलाजनिकरैरवकीर्यमाणा।

कीर्तिस्वयंवरपतेर्भरतस्य काले
    वैवाहिकी जननि ! वह्निशिखेव रेजे॥ ५.१३ ॥

छत्रेन्दुमण्डलवती मणिपादुके ! त्वं
    व्याधूतचामरकलापशरप्रसूना।
सद्यो बभूविथ समग्रविकासहेतुः
    साकेतपौरवनितानयनोत्पलानाम्॥ ५.१४ ॥

प्रैक्षन्त वक्त्रैर्मणिपादरक्षे ! शत्रुञ्जयं शैलमिवाधिरूढाम्।
रामाभिधानप्रतिपन्नहर्षैः उत्तानितैरुत्तरकोसलास्त्वाम्॥ ५.१५ ॥

द्रष्टुं तदा राघवपादरक्षे ! सीतामिव त्वां विनिवर्तमानाम्।
आसन् अयोध्यापुरसुन्दरीणाम् औत्सुक्यलोलानि विलोचनानि॥ ५.१६ ॥

आस्थाय तत्र स्फुटबिन्दुनादं स्तम्बेरमं तादृशसन्निवेशम्।
अदर्शयस्त्वं पुरमध्यभागे पादावनि ! त्वत्प्रणवाश्रयत्वम्॥ ५.१७ ॥

दशग्रीवस्तम्बेरमदळनदुर्दान्तहृदये
    विहारस्वाच्छन्द्यात् विशति रघुसिंहे वनभुवम्।
स्ववात्सल्यक्रोडीकृतभरतशावेव भवती
    निराबाधां पादावनि ! न विजहौ कोसलगुहाम्॥ ५.१८ ॥

कैकेयीवरदानदुर्दिननिरालोकस्य लोकस्य यत्
    त्राणार्थं भरतेन भव्यमनसा साकेतमानीयत।
रामत्यागसहैरसह्यविरहम् रङ्गक्षितीन्द्रस्य तत्
    पादत्राणमनन्यतन्त्रफणितेरापीडमीडीमहि॥ ५.१९ ॥

समुपस्थिते प्रदोषे सहसा विनिवृत्य चित्रकूटवनात्।
अभजत पुनर्जनपदं वत्सं धेनुरिव पादुके ! भवती॥ ५.२० ॥

॥ इति श्रीपादुकासहस्रे प्रतिप्रस्थानपद्धतिः पञ्चमी ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥